PITRU MANTRA VAKYAM SWADUSHAGUM

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।

चित्रसेना इषुबला अमृद्ध्राः सतोवीरा उरवो व्रातसाहाः ॥

ब्राह्मणासः

पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।

पूषा नः पातु दुरितादृतावृधो **रक्षा** माकिर्नो अघशꣳस ईशत ॥

सुपर्णँ वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।

यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन् ॥

<u>PITRU MANTRA KRAMAM SWADUSHAGUM</u>

स्वादुष॒ꣳसदः पि॒तरः । स्वादुष॒ꣳसद॒ इति॑

स्वादु – स॒ꣳसदः । पि॒तरो॑ वयो॒धाः । व॒यो॒धाः कृ॑च्छ्रे॒श्रितः ।

व॒यो॒धा इति॑ वयः – धाः । कृ॒च्छ्रे॒श्रि॒तः श॒क्तीवन्तः । कृ॒च्छ्रे॒श्रि॒त इति॑

कृ॒च्छ्रे – श्रि॒तः । श॒क्तीव॑न्तो ग॒भीराः । श॒क्तीव॒न्त इति॑

श॒क्ति – व॒न्तः । ग॒भी॒रा इति॑ ग॒भीराः ॥ चि॒त्रसे॑ना इषु॑बलाः ।

चि॒त्रसे॑ना॒ इति॑ चि॒त्र – से॒नाः । इषु॑बला॒ अमृ॑द्ध्राः ।

इषु॑बला॒ इतीषु॑ – ब॒लाः । अमृ॑द्ध्राः स॒तोवी॑राः । स॒तोवी॑रा उ॒रवः ।

स॒तोवी॑रा॒ इति॑ स॒तः – वी॒राः । उ॒रवो॑ व्रातसा॒हाः । व्रा॒त॒सा॒हा इति॑

व्रात – सा॒हाः ॥ ब्राह्म॑नास॒ः पि॑तरः ।

पि॒तरः॑ सोम्या॑सः । सोम्या॑सः शि॒वे । शि॒वे नः॑ । शि॒वे इति॑ शि॒वे ।

नो॒ द्यावा॑पृथि॒वी । द्यावा॑पृथि॒वी अ॒नेह॑सा । द्यावा॑पृथि॒वी इ॒ति

द्यावा॑ – पृ॒थि॒वी । अ॒नेह॒सेत्य॒नेह॑सा ॥ पू॒षा नः॑ । न॒ः पा॒तु । पा॒तु

दु॒रि॒तात् । दु॒रि॒ताद्दृ॑तावृधः । दु॒रि॒तादि॑ति दुः – इ॒तात् । ऋ॒ता॒वृ॒धो॑ रक्ष ।

ऋ॒ता॒वृ॒ध इत्यृ॑त – वृ॒धः । र॒क्षा माकि॑ः । माकि॑र् नः ।

नो अघशꣳसः । अघशꣳस ईशत । अघशꣳस इत्यघ – शꣳसः ।
ईशतेतीशत ॥ सुपर्णं वस्ते । सुपर्णमिति सु–पर्णम् । वस्ते मृगः ।
मृगो अस्याः । अस्या दन्तः । दन्तो गोभिः । गोभिः सन्नद्धा ।
सन्नद्धा पतति । सन्नद्धेति सम् – नद्धा । पतति प्रसूता । प्रसूतेति
प्र – सूता ॥ यत्रा नरः । नरः सम् । सम् च । च वि । वि च ।
च द्रवन्ति । द्रवन्ति तत्र । तत्रास्मभ्यम् । अस्मभ्यमिषवः ।
अस्मभ्यमित्यस्म – भ्यम् । इषवः शर्म । शर्म यꣳसन् ।
यꣳसन्निति यꣳसन् ॥

Compiled by Shri P. R. Iyer

24.9.2021